स्वर्गीय पं. दीनदयालु उपाध्यायः

शारदा

१६ फाल्गुन १८८९
६ मार्च १९६८

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

इयं लोकसत्ता उत चेङ्गीजखाँ-साम्राज्यम्

भारतीय जनसंघाध्यक्षः पं. दीनदयालु उपाध्यायः केनचन नृशंसेन रेलयाने मोगलसराई-स्थानकपरिसरे निर्घृणं घातितः इति दुष्टवार्ता श्रुत्वा वयं संप्रति लोकसत्ताक-साम्राज्ये निवसामः उताहो चेङ्गीजखाँ-नादीरशहा-साम्राज्ये इति भ्रान्ताः सर्वे भारतीयाः । प्राप्ते अपि स्वतन्त्रे स्व-राज्ये न वयं सुतन्त्राः, सुराज्याः, सुसंस्कृताः इत्यस्यैव निदर्शनपरा घातपरंपरा इयम् । म. गान्धी, डॉ. श्यामाप्रसाद मुकर्जी, पं. दीनदयालु उपाध्याय इति त्रयाणाम् अपि महात्मनां क्रूरघातेन न वयं मानुषाः परं राक्षसाति-भयंकराः इत्येव सिद्धम् । स्वातन्त्र्यलक्ष्मीः स्वीयकुपुत्राणाम् अत्याचारपरंपरया तत्रापि राष्ट्रवीरघातिन्या भृशं लज्जिता अवमानिता साक्रोशं पृच्छति "अयि भारतीयाः ! किं शोभन्ते एतानि दुष्कृत्य-चक्राणि भारते वर्षे ? किम् एतदर्थं शतशः क्रान्तिवीरैः स्वीयं रुधिरं समर्प्य सुलभीकृता सर्वेषां स्वातन्त्र्यप्राप्ति-सोपानपरंपरा । किम् इदमेव चिराय स्वप्नचित्रितं रामराज्यम् ? किम् इदमेव फलितम् अहिंसा-सत्य-शान्ति-मन्त्रस्य ?

पं. दीनदयालुसदृशः सात्त्विक-पुरुष-श्रेष्ठः भारतीय-राजनीतिक्षेत्रे सुदुर्लभः इति विशेषः दुःखयति नः मानसम् । 'संस्कृतं राष्ट्रभाषा' इति सर्वप्रथमं राजनीतिरूपेण सैद्धान्तिकं तत्त्वं स्वीकृत्य भारतीय-जन-संघस्य निर्वाचनघोषणापत्रे तथा प्रकटीकृत्य संस्कृतस्य राष्ट्रीयं माहात्म्यं वर्धयितुं सुस्थिरीकर्तुं च कृतभूरिपरिश्रमाः पं. उपाध्यायाः जनसंघाध्यक्ष-पदं स्वीकृत्य मासद्वयेनैव स्वर्लोकम् आरोहन्ति इति कथं नाम सह्यम् ? मङ्गलाचरणे प्रारब्धे तदसमाप्ते एव भरतवाक्यघण्टिका कालेन खण-खणायिता चेत् करालकालस्य क्रौर्यं कैः शब्दैः धिक्कर्तव्यं नैव जानीमहे ।

'शारदा'कारैः १४ फेब्रुवारी ६८ दिने राजधानी दिल्लीनगरे यमुनातीरे 'निगमबोध' श्मशानभूमौ साञ्जलिबन्धं प्रार्थितः सर्वकाले-श्वरः पं. उपाध्यायानां सद्गतिमूलकचिरशान्त्यर्थम् । परं प्रकटीकृते शोकपर्वते, डॉ. झकीर हुसेन इन्दिरा गान्धी प्रभृति-शासक-श्रेष्ठैः गीते अपि गतस्य गुणगाने भारतीयजनमानसे अयं यक्षप्रश्नः अनुत्तरितः एव तिष्ठति—

'इयं लोकसत्ता उत चेङ्गीजखाँ-साम्राज्यम्' इति

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

पुणें) महाराष्ट्रराज्यशासन-भारतकेन्द्रशासन-पुरस्कृता विश्वप्रिया (मुम्बई
शृङ्गेरी-शारदापीठ-श्री-शंकराचार्यैः संस्कृत-'शंकरकृपा'-त्वेन स्वीकृता

सौर १६ फाल्गुन १८८९

शारदा

संपादकः वसन्त अ. गाडगीळ.

वर्षम् ९ अङ्कः ९

वार्षिकमूल्यम् रु. ५ * अस्य अङ्कस्य रु. ००-२५

श्रीशृङ्गेरी-जगद्गुरु-महासंस्थानम्
शृङ्गेरीमठ-शारदापीठम्, शृङ्गेरी [कडूर-मैसूर]

संचारस्थलम्— तिपटूरु

क्र. ३३०-६८ दि. १५-२-६८

श्रीवसन्तशर्मा गाडगील महाशयाः, सन्तु प्रणामाः ।

...श्रीचरणानां महाराष्ट्रदेशसंचारावसरे भवन्तः सहैवावस्थाय भक्त्या श्रीचरणान् असेवन्त । तत्र जनानां भगवति भक्तिं, विदुषां शास्त्रेष्वनुरागं धर्म-श्रद्धां च आकलय्य गुरुचरणाः समतुष्यन् । पुण्य-पत्तने सर्वमेतत् मूर्तमिव मन्यामहे । श्रीशंकर थत्तेमहाशयानां धर्मश्रद्धा गुरुभक्तिश्च नितरां प्रशंसार्हा । श्रीचरणानां स्वागताय निर्मिता समितिः श्रद्धया कार्यभरम् उदवहत् । सर्वेऽपि श्री शारदा-चन्द्रमौलीश्वरयोः अक-म्पानुकम्पया कुशलिनः सन्त्विति श्रीचरणानाम् आशासनं निवेदयामि ।

पण्डितवराणां श्रीकवीश्वराणाम् आध्यक्ष्ये प्रवर्तिष्यमाणा 'श्री'-सेवा-समितिः तेषां सदाशयान् अनुरन्धाना धर्मान् अनुतिष्ठन्ती प्रका-शताम् ।

... कोयनाप्रान्तस्थानां विद्याधनानाम् उपकृतये शतं रूप्यकाणि श्रीशारदाप्रसादं श्रीचरणानाम् आशीर्वादेन सह प्रहिणोमि ।

...भगवान् कुशलं विदधातु । श्रीचरणानां शुभाशिषो निवेदयामि ।

इति निवेदयिता

व्यक्तिगतसचिवः एन्. लक्ष्मीनारायणशास्त्री

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

वन्द्यः स मे श्रीशिवरामशास्त्री

यद्वाग्विसर्गोऽत्र निसर्ग-शुद्धः
शङ्कार्तति व्याकरणानुबद्धाम् ।
क्षणादिवान्तेवसतां धुनोति
धन्यः स मन्ये शिवरामशास्त्री ॥१॥
आचार इत्येव स पुस्तकं तत्
स्वसन्निधौ स्थापयतीति मन्ये ।
यतोऽस्य तावत् त्रिमुनिप्रणीता
सा शब्दविद्या रसनाञ्चलस्था ॥२॥
येन स्वयं व्याकरणं प्रशस्तम्
महेश्वरात् पाणिनिनेव लब्धम् ।
परम्परामत्र च तत्प्रणीतां
नेतुं पुरस्तात् कृतयत्न एषः ॥३॥
पाणिस्थितं यस्य च पाणिनीयं
कात्यायनो यद्-रसनाग्रवर्ती ।
पतञ्जलिर्यस्य हृदन्तरस्थः
वन्द्यः स मे श्रीशिवरामशास्त्री ॥४॥
कृशत्वमङ्गेषु गुणेषु पुष्टिः
एकान्ततीव्रत्वमथास्ति मत्याम् ।
वदान्यता चेतसि यस्य नि[illegible]
वन्द्यः स मे श्रीशि[illegible]मशास्त्री ॥५॥
लोकत्रये यस्य मुनित्रयान्यद्
नाभ्यर्हितं किञ्चिदपीति सत्यम् ।
यतस्त्रिसन्ध्यं किल वर्णिवर्गः
शृणोति यस्मात् त्रिमुनिप्रतिष्ठाम् ॥६॥
अगाध-विद्या-सुलभोऽवलेपः
स्वप्नेऽपि यं न स्पृशति प्रकाशम् ।
तेनाधिगच्छन्ति सुखेन बाला
यस्मात्सदा व्याकरणस्य तत्त्वम् ॥७॥
प्राचीनरीतौ रतिरस्य पूर्णा
तथा नवीनेऽपि च पक्षपातः ।
इदं तु चित्रं पुनरत्र मन्ये
प्रत्नेन नूत्नं सहवासमाप्तम् ॥८॥

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

अध्यापनैकाग्रमना मनस्वी
जोशीत्युपाह्वः शिवरामशास्त्री ।
प्रज्ञा यदीयाऽखिलरूपसिद्धि-
सम्यक्परीक्षा-निकषायमाणा ॥९॥

श्रोतुं मुखाद्यस्य च पाणिनीयं
शास्त्रं सदैव स्पृहयन्ति तज्ज्ञाः ।
शैलीमपूर्वामवलम्ब्य येन
दूरीकृतोऽध्यापनदोष-सार्थः ॥१०॥

यदीय-सौन्दर्यमयी सुदृष्टिः
लब्धावकाशा खलु पाणिनीये ।
तांस्तान्विशेषान् किल बुद्धिगम्यान्
छात्रेषु नित्यं प्रकटीकरोति ॥११॥

प्रतिक्षणं यो हि नवीनमर्थं
प्रकाशयत्यत्र च सूत्रसार्थात् ।
सूत्राणि मन्ये स्वयमेव कामं
स्वार्थं यथार्थं कथयन्ति वाऽस्मै ॥१२॥

यथा तथा वा भवतु प्रकामं
ज्ञेयं यदा व्याकरणं भवेत् तत् ।
तदा स केनापि विचक्षणेन
ध्येयः सदा श्रीशिवरामशास्त्री ॥१३॥

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

श्रुतेर्मुखत्वेन यदीरितं तत्
पठन्ति च व्याकरणं हि येऽस्मात् ।
अनेक-शास्त्राध्ययनस्य सारं
संप्राप्नुयुर्निश्चतमेव तेऽत्र ।।१४।।
दृष्ट्वा पुनर्व्याकरणस्य शैली
यं प्राप्य बालैरिह कापि नव्या ।
भव्याशयं ते मनसा दधाना:
कृतज्ञतामस्य वदन्ति शश्वत् ।।१५।।
य: कश्चन स्याद्विषय: प्रकामं
पृष्ट: पुनश्छात्रगणेन तावत् ।
तत्रोत्तरं विस्तरशालि सम्यग्
जानाति दातुं शिवरामशास्त्री ।।१६।।
रूक्षं खलु व्याकरणं नितान्तम्
इति प्रवाद: प्रथते पृथिव्याम् ।
तत्रापवाद: शिवराम-शास्त्रि-
प्रणीतमध्यापन-कार्यमेव ।।१७।।
'बुभुक्षितैर्व्याकरणं न भुज्यते'
इति स्फुटं, चित्रमिदं परन्तु ।
शृण्वन्ति विस्मृत्य तृषं क्षुधं ताम् ।
एतत्कृताध्यापनमत्र बाला: ।।१८।।
तावत्खलु व्याकरणं न रम्यं
तावच्च कामं गहनं तदस्तु ।
यावन्न तत् पाठयितुं पुरस्तात्
प्राप्त: पुन: श्रीशिवरामशास्त्री ।।१९।।
गीर्वाणभाषाध्ययनस्य केन्द्रं
संप्रत्यनेनास्ति विभूषितं तत् ।
शंसन्ति सन्तो घटनामिमां तु
यथा शुभं काञ्चनरत्नयोगम् ।।२०।।
न केवलं भारत एवं देशे
यशोऽस्य तावत् प्रथते विशेषात् ।
किन्त्वस्य शिष्या: सुधिय: सदैव
द्वीपान्तरेऽपि प्रथयन्ति कीर्तिम् ।।२१।।
यद्वक्तुमिष्टं यदि नोच्यते तत्
तदानुतापाय भवत्यजस्रम् ।

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

इत्येव भूतार्थतयाऽनुभूतः
स्फुटीकृतः स्वात्मसुखाय भावः ॥२२॥
गुणाद्भुते वस्तुनि मौनिताऽत्र
व्यनक्ति वाचां विफलत्वमेव ।
इत्येव विद्वत्-कुलभूषणस्य
कृता यथाबुद्धि मया प्रशस्तिः ॥२३॥
सेयं हठाकृष्ट-पदानुबद्धा
पर्याप्तरूपा न भवेत् सपर्या ।
परं प्रयत्नोऽयमकिञ्चनस्य
प्राप्तुं किलानृण्यमिहांशतोऽपि ॥२४॥
ज्ञानोन्नतोऽसौ विनयावनम्रः
छात्रोपकारप्रवणः सदैव ।
युज्येत सर्वाभ्युदयेन लोके
किमन्यदाशास्यमकिञ्चनेन ?

श्रीशारदा-मन्दिरम्
पुण्यपत्तनम् २

— विदुषां विधेयः
अकिञ्चनः ।

सुस्वागतम्

आचार्यश्रीतुलसी

'संयमः खलु जीवनम्'-इति संदेशस्य प्रसारार्थं महाराष्ट्र-मण्डलं प्राप्ताः सन्ति अणुव्रत-प्रवर्तकाः आचार्यश्रीतुलसी महोदयाः येषां स्वागत-समारोहे 'शारदा सामोदम् अग्रतः सरति ।

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

डॉ. ना. ज. शेण्डे

केषांचन जनानां मिलनं यदृच्छया बहोः कालादूर्ध्वं भवति । न खलु मिलनात्पूर्वं ते संमिलिताः । न च तेषां परस्परविषयिका वित्तिः नैव आसीत् । नापि तेषां समानाः सुहृदः न आसन् । तथापि मन्ये नियत्या हि तेषां मिलनपूर्विका परस्परेषु वर्धिष्णुः स्नेहप्रवृत्तिः विलम्बिता । एषा एव कथा डॉ. शेण्डे-महाशयानां मया मिलितानाम् ।

१९५१ तमे ख्रिस्ताब्दे मया ते दृष्टाः । एल्फिन्स्टन् महाविद्यालये वारं वारं गतस्य मम दृष्टिपथे वर्तमानाः ' ते अचिरादेव संस्कृताध्यापकपदे नियुक्ता ' इति ग्रन्थपालमुखात् परिचायिताः ।

तदनु संस्कृत-अभ्यास-निदेशेन मण्डलस्य सभानाम् अवसरेषु मितभाषणेन, मूर्तिमता मार्दवेन, चक्षुषोः भासमानेन अकुटिलेन च आर्जवेन तैः मदीयं चेतः आवर्जितम् । एवं भूते अपि किम् आवयोः मिथः संवादः संजातः? कथमपि विलम्बितः एव असौ ।

अथ कदाचित् मम छात्रद्वयम् सहकारी अध्यापकश्च पदवीम् आकाङ्क्षमाणाः डॉ. शेण्डे महाशयानां मार्गदर्शनं लभमानाः नैकवारं मन्मनसि स्थितां तेषां मूर्तिं स्वानुभूतकथनैः सुरेखतराम् आकारितवन्तः ।

नैकानि संवत्सराणि एवं हि व्यतीतानि । अस्मिन् नगरे कथमपि आवां समाने एव कार्यालये समानायां गृहजनविरहितायां दशायां समानायां निवासवीथ्यामेकत्र प्राप्तौ । परस्परविषयकं दूरस्थयोः कुतूहलं प्रत्यक्षायमाणया परस्परप्रवृत्त्या दूरयितुमिव ।

संस्कृतं यद्यपि आवयोः अध्यापनस्य संशोधनस्य विषयः तथापि अन्यासां भाषाणाम् अन्येषां च देशानां साहित्येषु सरुचिकौ समानधर्माणौ कथं नु मुम्बय्यां नैकत्र समागतौ इति नैकवारम् आवयोः आश्चर्यम् आविरभूत् ।

अन्यच्च । स्ववयोवृद्धिं ज्ञानवृद्धिं च (घनाढ्यतरत्वं च) अविगणय्य एव सर्वत्र जनेषु प्रवृत्तिपराः डॉ. शेण्डेमहाशयाः ' ते के अज्ञातबान्धवा ' इति व्यपदेशभागिषु विरलेषु जनेषु गणनीयाः एव ।

इयता न समाप्यते एषा कथा । ज्ञानविरताः सततं भूत्वापि ज्ञानं प्रदर्शयितुमनुत्साहिनः खलु ते चिरं विकत्थनस्यापि वचांसि निशामयन्तः किंचिदपि उद्वेगचिह्नम् आविर्भवितुं न ददति । अथ च किंचिदिव स्मितपूर्वकं मन्देनापि समर्थेन वचसा तस्य तथाविधं प्रतिवादं कुर्वन्ति

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

यथा स्वभूमिकां परित्यजन् अपि मनागपि दुःखमनुभवन् असौ हृष्टमना मैत्रं मनसि जपन् प्रतिनिवर्तते ।

ज्ञानभारोद्वहनम् अपि तेषां तृणोद्वहनमिव अकिञ्चित्करणीयम् । सदैव गजनिमीलितमिव दर्शयन्तः ज्ञानेऽनागस्का इव ते आसन् । सामान्येषु मध्ये स्थित्वा असामान्यत्वम् अनुद्घोषयन्तश्च स्वम् असामान्यत्वं सहजं हि प्रत्यक्षाययन्ति । परिहासकथानां च विषयम् आत्मानमेव कुर्वाणाः स्ववचसा समीपस्थं जनम् आल्हादयन्ति उद्बोधयन्ति च ।

कुसुमेषु तेषां विलोभनम् । चित्रपटेषु दर्शनकुतूहलम् । निरागसां बालकानां क्रीडासु सकुतुकम् अवलोकनम् । व्यथितजनानां शल्यवेदनाम् लघूकर्तुं तेषां यत्नः । ' चहा 'पाने प्रवृत्तिः । नित्य-नूतनेषु ग्रन्थेषु रुचिः व्यासक्तिः । स्वसुखे च अनासक्तिः । मन्ये सततं धूम्रिकां (सिग्रेट) कराग्रे अधरे च वहन्तः धूमायितस्य नरजीवनस्य स्मरणद्वहन्तः दुःखलेशोऽपि अभितः कथं न तिष्ठेत् इति अपेक्षमाणाः ते वर्तन्ते स्म ।

डॉ. ना. ज. शेण्डे

नियतः तेषाम् आहारः । नियतश्च विहारः । कार्यकरणं नियतम् । भाषणमपि नियतम् । अनियता केवला स्नेहप्रवृत्तिः सर्वातिशायिनी । जीवनस्य नाना अवस्था अनुभूय अनासक्ता अपि सुखेषु स्वजनानाम् आनन्दवर्धना एव आसन् । अक्लेशकरः सर्वेषां भूयासमिति काङ्क्षन्तः एव मन्ये मृत्युमपि स्वपर्यन्तमागमनस्य दुःखम् अनुभावयितुम् अकाङ्क्षन्तः स्वयमेव मृत्युनिदेशितं स्थानं चलिताः । अनायासेनैव मृत्युना आसादिताः ।

अधुना (२०-३-१९६८) तेषां दिवं गतानां वर्षं भवति । पुनः पुनः सर्वेषां प्रातिवेशिकानां मनसि तेषां स्मृतिः जागर्ति । सायंतनेषु निरभ्राकाशस्य अधस्तात्, वृक्षगुल्मकान् साक्षीकुर्वतां पक्षिणां परस्परं संमिलनावसरे किलबिलारावं कुर्वतां श्रुतिसुखदं सङ्गीतमनुभूय वेल्लन्तीनां वल्लरीन् अशब्दावेदनं स्वीकुर्वतो मे मनसि च चिरवियुक्तस्य मे सुहृदः स्मरणस्य अभ्रं स्वच्छायया जाल्यं वितनोति !

संस्कृत-प्रगताभ्यास-केन्द्रम्
पुणें विद्यापीठम्
पुण्यपत्तनम् ६

शान्ताराम जोग

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

थत्तेमहाशयानां धर्मश्रद्धा प्रशंसार्हा



"श्री शंकर थत्तेमहाशयानां धर्मश्रद्धा गुरुभक्तिश्च नितरां प्रशंसार्हा इति शृङ्गेरी-'श्री'-चरणाः। उद्यानप्रासादस्वामिनः श्रीशंकररायाः छायाचित्रे गुरुभक्तिपरायणाः दृश्यन्ते। दक्षिणकोणे 'शारदा'काराः।
दि. १३-११-१९६७

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

॥ श्रीः ॥

राजधानी दिल्ली
१४ फेब्रुवारी ६८

आयुष्मते गिरीशाय स्वस्ति !

अद्य प्रातः ६ वादनसमये डेहराडून-एक्सप्रेस-यानेन प्रापितः अस्मि राजधानीं दिल्लीम् । नव-दिल्ली-स्थानकम् अवतीर्य त्रिचक्री- (रिक्षा) यानेन यमुनातीरे स्थितां निगमबोध-घाटाख्यां श्मशानभूमिं प्राप्तः ।

तत्र स्वर्गीय-जनसंघाध्यक्ष पं दीनदयालु उपाध्यायानाम् अस्थि-संचयविधिं होरान्तं निरीक्ष्य पुष्पाञ्जलिं समर्प्य श्री. अटलबिहारी वाजपेयीमहोदयानां निवासस्थानं प्राप्तः । अत्र स्थापितः आसीत् स्व. उपाध्याय-अस्थि-कलशः पुष्पहारैः सुभूषितः ।

मध्याह्ने द्वादशवादनसमये केनचन पुरोहितेन अटलबिहारीद्वारे विरचिते मण्डपे अस्थिकलशस्य पुरस्तात् रङ्गवल्लीं भूमौ विलिख्य तदुपरि मृत्तिकया सिद्धीकृता यज्ञवेदी । आदिष्टाः सर्वे तत्र समुपस्थिताः होममहवनादिकार्ये संमिलितुं हस्तौ पादौ च प्रक्षाल्य तत्र उपवेष्टुम् ।

अशौचकाले किं माङ्गलिकम् अत्र अनेन प्रारब्धम् इति शङ्कितेन चेतसा मया सूक्ष्मेक्षिकया प्रारब्धं तन्निरीक्षणम् । ब्राह्मणेन तेन पुरोहितेन प्रार्थिताः श्री. अटलबिहारी वाजपेयीमहोदयाः तत्र हवनकार्ये यजमान-त्वेन कार्यं प्रारब्धुम् । शोकार्तनेत्रः धीरगभीरः श्री. अटलबिहारी तत्र स्थित्वा पुरोहितस्य आदेशम् आदृत्य "अग्नये स्वाहा । गायत्र्यै स्वाहा । सावित्र्यै स्वाहा ! ..." इ. स्वाहाकारं श्रावं श्रावं स्वाहाकारविधिम् अनुष्ठितवान् । तत्र संमिलिताः सर्वे शोकविह्वलाः अपि तस्मिन् स्वाहाकारे संलग्नाः आसन् । पुरोहितेन श्रीसूक्तं, पुरुषसूक्तं, रुद्रपाठं च पठित्वा प्रत्येकं मन्त्रान्ते स्वाहाकारम् उद्घोष्य आहुतिद्रव्यसमाप्त्यन्तं प्रचालितं यज्ञकर्म । अत्रान्तरे स्मृतं तेन यद् यजमानः यज्ञोपवीतविहीनः इति । सपदि तेन हवनकर्म स्थगितीकृत्य यजमानकण्ठे स्थापितं 'यज्ञोप-वीतं परमं पवित्रम्...।' अन्ततो गत्वा "इदं पूर्णाहुत्यै वसोर्धारायै न मम ।" इति प्रोच्य तेन पूर्णाहुतिः कारिता ।

अहं सर्वम् इदं साक्षात्कृत्य मूढतां गतः । जनसंघाध्यक्षाणां वार्तोत्तरं तृतीये दिने कीदृशम् इदं यज्ञकर्म किंप्रयोजनं नाहं जाने ।

अस्थिकलशस्य पुरस्तात् हवनविधिः नैजे आयुषि मया प्रथमम् एव साक्षात्कृतः । अनेन नाहं चकितः परं भृशं लज्जितः दुखितः च । रामरक्षा-स्तोत्रं पाठं पाठं विवाहं श्राद्धविधिं च कुर्वाणाः रामरक्षामात्र-पाठकाः ब्राह्मणाः मया पूर्वं साक्षात्कृताः । परं दिल्लीनगरे अनुभूतं विपरीतम् एव । हन्त धर्म ! का ते गतिः ?

अधिकम् अग्रिमपत्रे ।

—— बाबा

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

मूळ गीतेचा शोध

प्रपन्नपारिजाताय तोत्रवेत्रैकपाणये ।
ज्ञानमुद्राय कृष्णाय गीतामृतदुहे नमः ।।

श्रीमद्भगवद्गीतोपनिषदः नैकभाष्याणि संजातानि । तत्र यज्ज्ञानं विद्यते ब्रह्मज्ञानपरं, निष्कामकर्मपरं, भगवद्भक्तिपरं वा तस्य विवरणं तैस्तैर्भाष्यकारैर्यथामति कृतं स्वेषु स्वेषु भाष्येषु । किंतु तेषु नैकस्यापि मनसि शङ्का समुत्पन्ना यदियं गीता एककृता, अनेक-कृता वा, इति । ते सर्वे गीताया अन्तरङ्गे किं वर्तते इति विषये दत्तचित्ता आसन् । गीतोपदेशाऽऽकृष्टमनसां तेषां दृष्टिः गीताया बहिरङ्गे न कदापि पतिता ।

किंतु गतास्ते दिवसाः । काललीलया अस्माकं पाश्चात्त्यैः सह संसर्गः संजातः । संस्कृत-वाङ्मयेन तेषामपि मन आकृष्टम् । आवेदाद्-भारतीय विद्यानामभ्यासस्तैः पाश्चात्यपण्डितैररि प्रारब्धः । तदाप्रभृति 'श्रीमद्भगवद्गीता न रचिता एकेनैव, अपितु अनेकैस्तस्याः पाठे समये समये स्वकीयरचनां संमिश्र्य अद्यतनः पाठः कृतः ' इति मतं प्रसृतमभूत् । परन्तु न केनापि स्पष्टमेवेदं निर्दशितं यद् इयान् भागः पूर्वः इयानपर इति । एतन्महत्कर्म संपादितमधुना पुण्यपत्तनस्थेनैकेन विदुषा 'डॉ. ग. श्री. खैर ' इति नाम्ना । महाराष्ट्रीयभाषायां प्रकाशित एव ग्रन्थः सत्यमेव गीताभ्यासादर्शः बहिरङ्गदृष्टया । यां सरणिमनुसृत्य अनेन स्वसिद्धान्तः प्रस्थापितः सा संपूर्णा सरणिः अस्मिन् ग्रंथे विस्तरेण प्रपञ्चिता । महाराष्ट्रभाषावाङ्मयमनेन ग्रंथेन श्रियायुक्तं जातमिति मे मतिः ।

पण्डितवर्येणानेन सुष्ठु प्रस्थापितं यद् वर्तमाना श्रीमद्भगवद्गीता त्रिभिर्लेखकैः अद्यतनं स्वरूपं प्रापितेति । प्रथमेन गीताकारेण रचिता षडध्यायात्मिका गीता । एषा कर्मयोग-सिद्धान्त-स्थापन परा । पश्चात् द्वितीयेन ऋषिणा कर्मयोगः कथं सव्यवहारो भवेदिति बुद्ध्या नवीनानां षण्णामध्यायानां रचनां कृत्वा षडध्यायी गीता द्वादशाध्याययुक्ता कृता । अन्ततः तृतीयेन गीताभक्तेन तां भक्तियोगपरां कर्तुं न केवलं नवरचना कृता षण्णामध्यायानामपि तु ये द्वादशाध्याया आसन् तेष्वपि स्वरचनया वृद्धिं कृत्वा अष्टादशाध्यायिनी वर्तमाना सुसंश्लिष्टा गीता प्रवर्तिता । एतत्सर्वमनेकैः प्रमाणैः प्रस्थापितमस्मिन् ग्रन्थे ।

लेखकः – डॉ. ग. श्री. खैर पृष्ठसंख्या २०८ मूल्य रू. ५.००
अनाथ-विद्यार्थि-गृह-प्रकाशनम्, पुण्यपत्तनम् २

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

सर्वमिदं न केवलं सामान्यतया प्रतिपादितमस्ति । किंतु प्रत्यध्यायं का प्रथमरचना के च श्लोकाः पश्चात्कृता इति सर्वं विशेषरूपेण वर्तमाना संपूर्णा गीता लेखकत्रयरचनां स्पष्टीकर्तुं कृष्णनीलारुणमषीवर्णैः सुष्ठु प्रकाशितास्ति ग्रन्थेऽस्मिन् । अभिनवरीत्यानया प्रथमरूपा गीता कियती, द्वितीयावस्थायां तस्याः किं स्वरूपं जातम्, पश्चात् कैः कैः श्लोकैः संवर्धिता सा इत्येतत्सर्वं स्पष्टमेव विज्ञायते ।

एतन्मतानुसारेण आद्या गीता 'अथ व्यवस्थितान् दृष्ट्वा । इत्यादिना वर्तमानगीतायाः विंशेन श्लोकेन प्रारभ्यते । किंतु पाठमेतत्प्रकारकं कर्तुमनाः पाठकः एकविंशे अर्थात् अनन्तरस्मिन्नेव श्लोके 'महीपते' इति संबुद्ध्यन्ते पदे प्रस्खलति, कस्यापि महीपतेः प्राग्वर्णनाभावात् । अतः गीतारम्भे स्थितः 'धृतराष्ट्र उवाच-धर्मक्षेत्रे...' इत्यादिः श्लोकः आद्यगीतायामप्यावश्यक इति भाति । तेन श्लोकेन कृते प्रारम्भे संजयमुखे 'महीपते' इत्येतत्पदं सुष्ठु शोभिस्यते । अत एव 'धृतराष्ट्रोक्तः प्रथमः श्लोकः', संजय इति अनन्तरं पदं च अरुणवर्णेन मषीलेखनेन एव दातव्यं वर्तते । तथैव आद्याया गीताया समाप्तिरपि न वर्तते निराकाङ्क्षा । श्री.खैर महोदयेन सा कृता 'तपस्विभ्योऽधिको योगी...तस्माद्योगी भवाऽर्जुन' इति षष्ठाध्यायस्य षट्चत्वारिंशत्तमेन श्लोकेन । अत्र यो योगः प्रतिपादितः स ध्यानयोग इति ग्रन्थकारस्यापि मतं दृश्यते तस्य शब्दस्य अरुण-वर्णेन लिखितत्वात् । तं 'उपविश्यासने युञ्ज्याद्योगमात्मविशुद्धये' इत्यपि तेनैव कारणेन दृश्यते ग्रन्थकारसंमतं च । अतः यद्यस्यैव ध्यानयोगस्याचारेण अर्जुनेन योगिना भाव्यं स्यात्तर्हि भगवद्गीतां श्रुत्वा अन्तिमोपदेशानुसारेण अर्जुनेन रणाङ्गणं त्यक्त्वा 'योगी युञ्जीत सततमिति षष्ठाध्याये कथितं वर्तनमेव कार्यमिति तात्पर्यं निष्पन्नं भवेत् । एतत्तु ग्रन्थकारमतेनाप्ययुक्तमेव स्यात् । तस्मादत्रापि अध्यायेष्टादशे ध्यानयोगपरौ नित्यमित्यादी ब्रह्मभूतः प्रसन्नात्मा न शोचति न काङ्क्षति इत्यन्तौ द्वौ श्लोकौ ताभ्यामनंतरं तदध्यायस्थ एव भगवतः 'कच्चिदेतच्छ्रुतं' इति प्रश्नः अर्जुनस्य च 'नष्टो मोहः' इत्याद्युत्तरम् आद्यगीतायां समाविष्टं स्याच्चेत्, आद्या सा गीता स्वारंभा स्वान्ता च भवेदिति ग्रन्थकारेण विचार्यमेव ।

एतद्ग्रन्थपठनादनन्तरं प्रश्न एकः समुद्भवति तस्यापि विचारः कार्य एव । ग्रन्थकारेण त्रयाणां गीतालेखकानां श्रोतृवर्गः अपि विभाजितोऽस्ति । तन्मतेन प्रथमलेखकस्य श्रोतृवर्गे ज्ञानिनो मुनयः आधिक्येनासन् । द्वितीयलेखकेन गृहस्थाश्रमिणां कृते उपयुक्ता कृता आद्यगीता । अन्ततः तृतीयेन लेखकेन या गीता विरचिता सा समाजं संपूर्णं श्रावयितुम्

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

एव । त्रिभिरपि लेखकैः गृहीतमेव यद् भगवता अर्जुनायेयम् उपदिष्टा । एवं चेदाद्याया गीताया अपि आद्यतरा गीता संभवेत् । अस्यां गीतायां वक्ता श्रीकृष्णः श्रोता अर्जुनः । रणाङ्गणे स्वजनान् दृष्ट्वा करुणापूर्णचित्तः अर्जुनो जातः । स्वजनवधपापकल्पनया स मोहितोऽभूत्, तेन त्यक्तं चापम्, स रथोपस्थ उपाविशत् च । अस्मिन् प्रसंगे श्रीकृष्णोपदेशस्य एक एव हेतुः भवेत् । स च अर्जुनमोहनिवारणम् युद्धाय तत्प्रवर्तनम् । अतः ज्ञानिनो मुनीन् श्रावयितुं यः कर्मयोगस्य प्रपञ्चः कृतः सोऽनावश्यकयेव दृश्यते । अनया दृष्ट्या अस्या आद्याया गीताया अपि लघुतरा केवलमर्जुनप्रवर्तनपरा लघ्वी गीताऽपि प्रथमलेखकरचितेभ्यः श्लोकेभ्यः संभाव्या । मान्यो भवेच्चेदेष विचारः, तयाऽपि दिशा केवलं युद्धप्रवर्तनपरा, कतिभिश्चिन्निमेषैः अल्पतरैश्च वाक्यैः समापनीया आद्यतमा गीताऽपि निष्कृष्टा भवितुमर्हा । तामपि निष्कृष्य हरितमषीवर्णेन प्रकाशयितुमर्हति ग्रन्थकारः । तेन तथा कार्यम् इति सम्प्रार्थ्य विरम्यते अस्माद् विवेचनात् ।

'मुद्रिका'
८० पर्वतीदर्शनम्
पुण्यपत्तनम् ९

दिवेकरोपाह्वो रामचन्द्रसुतो हरिः

* *

॥ श्रीः ॥

वाराणसी
२०-२-६८

नमः श्रीमद्भ्यो **गाडगीळवसन्तरायेभ्यो** वसन्तागमने
वासन्तिकचेतसा च ।

अनुगृहीतोऽस्मि तत्रभवतां भवतां कार्यमहिम्ना ।...' शारदा '-पत्रिका पू. श्री. शंकराचार्य-शृङ्गेरी 'श्री' चरणैः सनाथीकृता विशेषरूपेण इति श्रुत्वा नैकवारं भवतां शुभाभिनन्दनं व्याहरामो वयं काशीस्थाः वैदिकाः ।

श्रीकाशीविश्वनाथकृपया 'शारदा' पत्रं विश्वविख्यातं भवतु इति कामये ।

गणेशदीक्षितमार्गः
वाराणसी

भवदीयः
श्रीकृष्णदेवः

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

भारतशासनस्य वृत्तपत्र-विषयक-नियमम् अनुसृत्य फेब्रुवारी-मासोत्तरं प्रथमाङ्के प्रकाशनीयं ' **शारदा** '—स्वामित्वादिविषयकं निवेदनम् ।

(तुरीयं परिपत्रकम्-अष्टमः नियमः)

१ प्रकाशनस्थलम्—मुम्बई—पुणें.
२ प्रकाशन—समयः—पाक्षिकं सौर १,१६.
३ मुद्रक—नाम—**वसन्त अनन्त गाडगीळ**
४ ,, —राष्ट्रियता—भारतीयः
५ ,,—निवासः—१७०१५ पर्वती, पुणें ९
६ प्रकाशक—नाम—राष्ट्रियता—निवास...पूर्ववत्
७ संपादक— ,, ,, ,, ...पूर्ववत्
८ पत्रस्वामिनः ,, ,, ,, ...पूर्ववत्

अहं **गाडगीळ अनन्ततनयः वसन्तः** सविश्वासं प्रकटीकरोमि यद् ' उपरितनं शारदास्वामित्वादिविषयकं निवेदनं सत्यं विद्यते ' इति ।

वसन्त अ. गाडगीळ
प्रकाशकः—स्वाक्षरी

दि. २२—२—६८

वेदशास्त्रोत्तेजक-सभा-वार्षिक-परीक्षाः—

चैत्र कृ. ३, १८९० सोमवासरे १५ एप्रील ६८ दिने परीक्षाः प्रारप्स्यन्ते । १५ नवपणमूल्यं प्रेष्य आवेदनपत्राणि प्रार्थ्य परीक्षार्थिभिः एक-रूप्यक-शुल्क-सहितानि आवेदनपत्राणि १८ मार्च ६८ दिनात् पूर्वं कार्यालयं प्रति प्रेषणीयानि परीक्षार्थम् उपस्थितेभ्यः छात्रेभ्यः रूप्यक-शुल्कं प्रत्यर्पयिष्यते । परीक्षाभिः सह एव गीतापठनं, सन्ध्या-परीक्षा, संस्कृते वक्तृत्वपरीक्षा च भविष्यति ।

संस्कृत-वक्तृत्व-विषयाः

१ संस्कृत-विद्यायाः इतिहासः ।
२ श्रीमत् शंकराचार्याणां तथा च विद्यारण्यस्वामिमहाभागानां तत्त्वज्ञानं चरितं च ।
३ भूकम्पः, शोधः बोधश्च
४ भाषा-समस्या
५ गोवधनिरोधस्य आवश्यकता

उत्तीर्णेभ्यः छात्रेभ्यः उपाधिपत्राणि, प्रमाणपत्राणि, पारितोषिक-द्रव्यं च सभानियमम् अनुसृत्य वितरिष्यते ।

कार्यवाहौ
वेदशास्त्रोत्तेजकसभा

१२६३ सदाशिव,
पुण्यपत्तनम् २

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

शारदा– (पुण्यपत्तनम् २.) ९ : ९ ★ रजि. क्र. एम्. एच्. ५५७
० लायसेन्स क्र. १३७ टु पोस्ट विदौट प्रीपेमेण्ट.

शृङ्गेरी-श्री-शंकराचार्य-संचारः

फेब्रुवारी ६८ मासे
४–५–६ शिमोगा
७ लक्कवल्ली
८ कडूर
९–१० अरसीकेरी
११–१२ टिपटूर
१३–१४ होन्नावल्ली
१५–१६ टुमकूर
१७ शिवगङ्गा
१८ यशवन्तपुर
१९–२० बेङ्गलूरु

मार्च ६८ मासे
१–८ बेङ्गलूरु

कोयनाभूकम्पध्वस्त-विद्याधन-साहाय्यक-समितिः

पं. दत्तात्रेयशास्त्री कवीश्वर (अध्यक्षः)
घनपाटी किंजवडेकर दत्तात्रेयशास्त्री (उपाध्यक्षः)
पं. ना. श्री. सोनटक्के (,,)
पं. विनायकशास्त्री पराञ्जपे एम. ए. (कार्याध्यक्षः)
श्री. दुर्गादत्त हंसराज शर्मा (कोषाध्यक्षः)
पं. वसन्त अनन्त गाडगीळ (कार्यवाहः)

रू. १०१ शृङ्गेरी-श्री-चरणाः
रू. ५ पं. पां. रा. हर्डीकर-मुम्बई
रू. ६०८ पूर्वं प्राप्ताः
रू. ७१४—२५ फेब्रुवारी ६८ पर्यन्तम्

साहाय्य-प्रेषा-स्थलम्

'शारदा'-४२५ सदाशिव पेठ, पुण्यपत्तनम् २

संपादकः मुद्रकः प्रकाशकः स्वामी – वसन्त अनन्त गाडगीळ
मुद्रणस्थलम्– यशवन्त मुद्रणालयः, १८३५ सदाशिव, पुण्यपत्तनम् २.
प्रकाशनस्थलम्-१.- म.म. प्रा.द.वा.पोतदार, ४९८ शनिवार, पुण्यपत्तनम् २.
२.– श्री. ल.म. चक्रदेव, ३१८ राममोहनमार्गः मुम्बापुरी ४.
...लयः— खजिनामहालभवनम्, ४२५ सदाशिव, पुण्यपत्तनम् २.

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri